# बिल्वाष्टकम्

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायुधम्। त्रिजन्मपापसंहारम् एकबिल्वं शिवार्पणम्॥ १

त्रिशाखैः बिल्वपत्रैश्च ह्यच्छिद्रैः कोमलैः शुभैः। शिवपूजां करिष्यामि ह्येकबिल्वं शिवार्पणम्॥ २

अखण्ड बिल्वपत्रेण पूजिते नन्दिकेश्वरे। शुद्ध्यन्ति सर्वपापेभ्यो ह्येकबिल्वं शिवार्पणम्॥ ३

शालिग्राम शिलामेकां विप्राणां जातु चार्पयेत्। सोमयज्ञ महापुण्यं एकबिल्वं शिवार्पणम्॥ ४

दन्तिकोटि सहस्राणि वाजपेय शतानि च। कोटिकन्या महादानम् एकबिल्वं शिवार्पणम्॥ ५

लक्ष्म्यास्तनुत उत्पन्नं महादेवस्य च प्रियम्। बिल्ववृक्षं प्रयच्छामि ह्येकबिल्वं शिवार्पणम्॥ ६

दर्शनं बिल्ववृक्षस्य स्पर्शनं पापनाशनम्। अघोरपापसंहारम् एकबिल्वं शिवार्पणम्॥ ७

काशीक्षेत्रनिवासं च कालभैरवदर्शनम्। प्रयाघमाधवं दृष्ट्वा ह्येकबिल्वं शिवार्पणम्॥ ८

मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे। अग्रतः शिवरूपाय ह्येकबिल्वं शिवार्पणम्॥ ९

बिल्वाष्टकमिदं पुण्यं यः पठेच्छिवसन्निधौ। सर्वपाप विनिर्मुक्तः शिवलोकमवाप्नुयात्॥ १०

## Bilvāṣṭakam

tridalaṁ triguṇākāraṁ trinetraṁ ca triyāyudham |
trijanmapāpasaṁhāram ekabilvaṁ śivārpaṇam || 1

triśākhaiḥ bilvapatraiśca hyacchidraiḥ komalaiḥ śubhaiḥ |
śivapūjāṁ kariṣyāmi hyekabilvaṁ śivārpaṇam || 2

akhaṇḍa bilvapatreṇa pūjite nandikeśvare |
śuddhyanti sarvapāpebhyo hyekabilvaṁ śivārpaṇam || 3

śāligrāma śilāmekāṁ viprāṇāṁ jātu cārpayet |
somayajña mahāpuṇyaṁ ekabilvaṁ śivārpaṇam || 4

dantikoṭi sahasrāṇi vājapeya śatāni ca |
koṭikanyā mahādānam ekabilvaṁ śivārpaṇam || 5

lakṣmyāstanuta utpannaṁ mahādevasya ca priyam |
bilvavṛkṣaṁ prayacchāmi hyekabilvaṁ śivārpaṇam || 6

darśanaṁ bilvavṛkṣasya sparśanaṁ pāpanāśanam |
aghorapāpasaṁhāram ekabilvaṁ śivārpaṇam || 7

kāśīkṣetranivāsaṁ ca kālabhairavadarśanam |
prayāghamādhavaṁ dṛṣṭvā hyekabilvaṁ śivārpaṇam || 8

mūlato brahmarūpāya madhyato viṣṇurūpiṇe |
agrataḥ śivarūpāya hyekabilvaṁ śivārpaṇam || 9

bilvāṣṭakamidaṁ puṇyaṁ yaḥ paṭhecchivasannidhau |
sarvapāpa vinirmuktaḥ śivalokamavāpnuyāt || 10